# संस्कृतम् (केन्द्रिकम्) कोड् सङ्ख्या - 322

## कक्षा – द्वादशी

**समयः – होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा अनुवादकार्ये पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि षड् वाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **खण्डः – क**<br>**अपठित – अवबोधनम् - 10 अङ्काः** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -** | **10** |
| | **(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्** | **1×2=2** |
| | (i) स्वशक्तेः<br>(ii) नराणाम्<br>(iii) हस्तिनम् | |
| | **(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम्** | **2×2=4** |
| | (i) "संहतिः कार्यसाधिका' इति वचनं जगति प्रसिद्धमस्ति। | |

| | | |
|---|---|---|
| | (ii) यस्मिन् राष्ट्रे सर्वे मानवा:, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति।<br>(iii) यदि वयं सङ्घीभूय स्थास्याम: तर्हि अवश्यमेव शत्रून् जेतुं समर्था: भविष्याम:। | |
| | | |
| | **(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।**<br>संहति: कार्यसाधिका /एकताया: प्रभाव: / सङ्घे शक्ति: कलौ युगे<br>अन्ये अपि शीर्षका: भवितुम् अर्हन्ति। | 1x1=1 |
| | | |
| | **(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्** | 1x3=3 |
| | (i) (ग) रचिता<br>(ii) (क) भारतीया:<br>(iii) (घ) मानवै:<br>(iv) (ख) एकताया: | |

## खण्ड: – ख

## रचनात्मक–कार्यम् - 15 अङ्का:

| | | |
|---|---|---|
| 2. | **भवान् आदित्य:। मुम्बई-नगरे वसति। भवान् गतसप्ताहे संस्कृतसम्भाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दै: रिक्तस्थानानि पूरयित्वा पुन: लिखत-** | ½x10=5 |
| | मुम्बईनगरत:<br>तिथि:- --------------<br><br>प्रिय मित्र (i) **रमेश**<br>सस्नेहं नम:।<br><br>अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) **विद्यालये** संस्कृतसम्भाषणशिबिरम् (iii) **आयोजितम्** आसीत्। चतुर्दशदिनानि यावत् वयं संस्कृतसम्भाषणस्य (iv) **अभ्यासम्** अकुर्म। तत्र एकस्या: लघुनाटिकाया: (v) **मञ्चनम्** अपि अभवत्। अहं तु विदूषकस्य (vi) **अभिनयम्** कृतवान्। सर्वे जना: हसित्वा हसित्वा (vii) **करतलध्वनिम्** अकुर्वन्। अहम् इदानीं सर्वदा संस्कृतेन एव संभाषणम् (viii) **करोमि**। भवान् अपि संस्कृतेन सम्भाषणस्य अभ्यासं (ix) **करोतु**। पितृभ्यां मम (x) **प्रणामाञ्जलिं** निवेदयतु।<br><br>भवत: मित्रम्<br>आदित्य:। | |

| | | |
|---|---|---|
| 3. | मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत - | ½x10=5 |
| | कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीविकार्जनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं (i) **घटं** प्राप्तवान्। तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म। एकदा रात्रौ सः (ii) **चिन्तितवान्** यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतं घटं विक्रीय तेन धनेन अजद्वयं क्रेष्यामि। कालान्तरे तेन (iii) **अजसमूहः** एव भविष्यति। अनन्तरम् अजसमूहं (iv) **विक्रीय** धेनूः क्रेष्यामि। अनन्तरं ताः विक्रीय महिषीः ताः विक्रीय अश्वान् च क्रेष्यामि। तान् अपि विक्रीय यथेष्टं धनं (v) **सम्पादयिष्यामि।** बृहत् गृहं निर्मापयिष्यामि। तदा कश्चित् (vi) **ब्राह्मणः** आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरं मम पुत्रः जनिष्यते। देवशर्मा इति तस्य (vii) **नामकरणं** करिष्यामि। यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां (viii) **पुस्तकम्** पठिष्यामि। तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्तः भविष्यति। तदा तं बालं ग्रहीतुं तस्य (ix) **मातरम्** आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि एवं चिन्तयन् सः (x) **पादप्रहारं** कृतवान् एव। पिष्टेन पूर्णः घटः पतितः, भग्नः च। " | |
| | **अथवा** | |
| | अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु। 1x5=5<br>तन्वी- सखि अवनि! भवती ह्यः विद्यालयं न आगतवती। अपि कुशलिनी त्वम्?<br>अवनि - तन्वि ! (i) **अहं सर्वथा कुशलिनी अस्मि।**<br>तन्वी- तर्हि ह्यः विद्यालयं किमर्थं नागता ?<br>अवनि – (ii) **ह्यः तु अहं पक्षिणां सौन्दर्यं द्रष्टुं पक्षिविहारं गता आसम्।**<br>तन्वी- अहो! पक्षिविहारम् अगच्छत्। बहूत्तमम्। कुत्रास्ति पक्षिविहारः ?<br>अवनि- (iii) **पक्षिविहारः नोएडा-नगरे अस्ति।**<br>तन्वी- 'नोएडा' इति नगरस्थस्य पक्षिविहारस्य विषये तु अहमपि श्रुतवती। के के खगाः दृष्टाः तत्र ?<br>अवनि – तत्र अनेके दुर्लभाः खगाः दृष्टाः, यथा काष्ठकूटः, नीलकण्ठः विविधाः चटकाः च।<br>तन्वी- अहो ! दुर्लभाः खगाः अपि दृष्टाः। अस्माकं पितरः तु कथयन्ति यत् तेषां शैशवावस्थायाम् अनेके खगाः गृहेषु इतस्ततः विचरन्ति स्म।<br>अवनि - वस्तुतः अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्रायः दुर्लभमेव।<br>तन्वी - सत्यं वदति भवती। (iv) **अद्यत्वे नगरेषु तु पक्षिणां दर्शनं प्रायः दुर्लभमेव।**<br>अवनि - भवती अपि पक्षिविहारं द्रष्टुम् अवश्यं गच्छतु। | |

| | | |
|---|---|---|
| | तन्वी - आम् सखि! (v) **अहं पक्षिविहारं द्रष्टुम् अवश्यं गमिष्यामि।**<br>**अवधातव्यम् - रचनात्मक-कार्ये वाक्यरचना प्रमुखा। अत्र अन्यानि अपि उत्तराणि भवितुं शक्नुवन्ति।** | |
| **4.** | **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –** | **1×5=5** |
| | (i) त्वं/ यूयं क्रीडनार्थं कदा गमिष्यसि/ गमिष्यथ।<br>(ii) लतिका कनिका च पठतः।<br>(iii) किम् अहं बहिः गच्छानि?<br>(iv) यूयम् अत्र किं कुरुत ?<br>(v) चेतनः चित्रं रचयति / निर्माति।<br>(vi) ह्यः बुधवासरः आसीत्। | |
| | | |
| | **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम् 20 अङ्काः** | |
| **5.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-**<br>**(केवलं प्रश्नषट्कम्)** | **1×6=6** |
| | (i) त्वदधीनम्<br>(ii) यान्त्यधमाम्<br>(iii) देव+आदेशः<br>(iv) सहस्रैः+अपि<br>(v) संन्यासिना+उक्तम्<br>(vi) मनुः+नाम<br>(vii) तावत्+मम | |
| **6.** | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नपञ्चकम्)** | **1×5=5** |
| | (i) (क) ज्ञानस्य उदधिः<br>(ii) (घ) विद्यया युक्तेन<br>(iii) (ख) यथोचितम्<br>(iv) (क) मितभाषिणाम्<br>(v) (ग) न अश्नन्<br>(vi) (घ) आचार्यः देवो यस्य सः | |

| | | |
|---|---|---|
| 7. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्) | 1x6=6 |
| | (i) (ग) प्र+सू+क्त<br>(ii) (घ) निर्मनस्विता<br>(iii) (क) अवेक्ष्यमाणे<br>(iv) (ग) युक्ता:<br>(v) (ख) एकाकिन्+ङीप्<br>(vi) (ग) सेवितव्यानि<br>(vii) (ख) संन्यासी | |
| 8. | कोष्ठकप्रदत्तपदैः सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कृत्वा लिखत – (केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) (ख) मुञ्जाय<br>(ii) (क) भिक्षावटुना<br>(iii) (घ) स्वाध्यायात्<br>(iv) (ग) प्रज्ञया | |
| | खण्डः-घ भागः-I<br>पठितांशावबोधनम् 25 अङ्काः | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½×2=1 |
| | (i) कापालिकः<br>(ii) भोजः<br>(iii) कापालिकस्य | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचद्-हे योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति।<br>(ii) शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्।<br>(iii) कापालिकः प्रावोचद्-राजन्! मा भैषीः। शिवप्रसादेन भोजो जीवितो भविष्यति। | |

| | | |
|---|---|---|
| | इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) भोजः<br>(ii) श्रुत्वा<br>(iii) सभामागतम् | |
| 10. | अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½×2=1 |
| | (i) जगतः<br>(ii) आसुराः<br>(iii) आसुरेषु/तेषु | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) आसुरेषु मनुजेषु न शौचं नापि चाऽऽचारो न च सत्यं विद्यते।<br>(ii) नष्टात्मानोऽल्पबुद्धयः उग्रकर्माणः जनाः जगतः क्षयाय प्रभवन्ति।<br>(iii) आसुराः जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। | |
| | इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) क्षयाय<br>(ii) सत्यम्<br>(iii) दृष्टिम् | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | ½×2=1 |
| | (i) समस्तसृष्टेः<br>(ii) आशीर्वचांसि<br>(iii) गान्धर्वविवाह-विधिना | |
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) मदालसा पृच्छति यत् अत्रभवन्तः नारीस्वाधीनतामधिकृत्य किं कथयन्ति ?<br>(ii) ऋतध्वजः गृहस्थाश्रमप्रयोगशालायाम् परीक्षार्थमुद्यतः आसीत्।<br>(iii) ऋतध्वजः प्रष्टुमुत्सहते यत् किं गन्धर्वराजविश्वावसुमहाभागाः अपि स्वपत्नीं युधिष्ठिर इव हारितवन्तः हरिश्चन्द्र इव विक्रीतवन्तः ?। | |

| | | |
|---|---|---|
| | **इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** | **1×2=2** |
| | (i) तूष्णीम्<br>(ii) स्वाधीनता<br>(iii) कुण्डलायै | |
| **12.** | **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –** | **1×3=3** |
| | भावार्थः –<br>(i) चन्द्रेण (ii) सुशोभिता (iii) विद्यायुक्तेन<br>**अथवा** | |
| | **प्रदत्तात् भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** | **1×3=3** |
| | (अ) (i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति।<br>(आ) (ii) दुष्टजनानां दोषेषु एव यत्नः भवति।<br>(इ) (ii) राज्ञे सज्जनः शत्रुः सन्नपि सम्माननीयः आसीत् यथा रुग्णाय औषधम्। | |
| **13.** | **अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत –** | **1×3=3** |
| | **अन्वयः –**<br>(i) अपरान् (ii) अहम् (iii) ईश्वरः | |
| **14.** | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** | **½×4=2** |
| | **'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) स्वायत्तमेकान्तगुणं विधात्रा। — (घ) विनिर्मितं छादनमज्ञतायाः।<br>(ii) आचार्याय प्रियं धनमाहृत्य — (ग) प्रजातन्तुं मा व्यवछेत्सीः।<br>(iii) स पिता पितरस्तासां — (क) केवलं जन्महेतवः।<br>(iv) प्रजानामेव भूत्यर्थं — (ख) स ताभ्यो बलिमग्रहीत्। | |
| **15.** | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत –** | **½×4=2** |
| | (i) विक्रीतम्<br>(ii) कोपितः<br>(iii) समक्षम्<br>(iii) चतुर्थः | |

| खण्डः – घ भागः – ii<br>सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः | | |
|---|---|---|
| 16. | अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) शिवराजविजयम्<br>(ii) मदालसा<br>(iii) महाकविः कालिदासः<br>(iv) प्रतिमानाटकम् | |
| 17. | गद्य-पद्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चित्वा लिखत - (केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) माघः<br>(ii) किरातार्जुनीयम्<br>(iii) मङ्गलाचरणम्<br>(iv) मातृमुक्ति-मुक्तावली | |
| 18. | समुचितं मेलयत - | 1×4=4 |
| | **भागः क** — **भागः ख**<br>(i) रूपकस्य भेदाः — (ग) दश<br>(ii) शूद्रकः — (घ) मृच्छकटिकम्<br>(iii) भरत-मुनिः — (ख) नाट्य-शास्त्रम्<br>(iv) उत्तररामचारितम् — (क) भवभूतिः | |

****************